GOVERNMENT OF INDIA

ARCHÆOLOGICAL SURVEY OF INDIA

CENTRAL
ARCHÆOLOGICAL
LIBRARY

ACCESSION NO 24071

CALL No. Sa 4 A/ Asa/ S.H.

D.G.A. 79

D284

THE

PRINCESS OF WALES

SARASVATI BHAVANA TEXTS

A.N
4387

EDITED BY

GOPĪ NĀTHA KAVIRĀJA

No. 14

THE

TRIVENĪKĀ

Printed by
JAI KRISHNA DASS GUPTA,
at the VIDYA VILAS PRESS,
Gopal Mandir Lane,
Benares City.

1925

CENTRAL ARCHAEOLOGICAL
LIBRARY NEW DELHI.
Acc. No.
Date.
Call No.

आशाधरविरचिता

त्रिवेणिका



CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

THE

TRIVENIKA

OF

ĀŚĀDHARA BHATTA

EDITED WITH INTRODUCTION, ETC.

BY

Baṭuk nātha S'armā Sāhityopādhyāya, M. A.,
Lecturer in Sanskrit, Benares Hindu
University, Benares; and
Jagannatha S'astrī Hoshing Sahityopadhyaya,
Sadholal Scholar, Sanskrit College,
Benares.

D 2815
Sa4A 24071
Aśā/S.H.

1925

CENTRAL ARCHAEOLOGICAL
LIBRARY NEW DELHI.
Acc. No. 24071
Date. 9.7.56
Call No. Sa 4A/Asa/S.H.

INTRODUCTION

I THE PRESENT WORK.

Its Title:

The small work, presented herewith, is called **त्रिवेणिका** or **शब्दत्रिवेणिका**। The title, though unique, is, however, quite appropriate and significant. The word **वेणी**, among many other senses it denotes, has that of a 'stream' or 'current.'(1) The compound word **त्रिवेणी** or **त्रिवेणिका**, conveys, therefore, the meaning of 'that which has three streams' or 'that which forms a collection of three streams.'(2) The word **त्रिवेणी** or **त्रिवेणिका** has come to be used more particularly for the confluence of the Gaṅgā and the Yamunā along with the hidden Sarasvatī at Prayāga. Our work has its name given to it after this confluence of the three sacred rivers, for the reason that it treats of three powers of words, namely, **अभिधा**, **लक्षणा** and **व्यञ्जना**। The point of comparison is not only the number three; but all the three there, are individually compared with all the three here. **अभिधा** is compared to the Gaṅgā, for like the river, it is also the life and support of the other two. Similarly **लक्षणा** stands in comparison to the Yamunā, for both of them directly depend for their life upon another, namely the **अभिधा** and Gaṅgā respectively. **व्यञ्जना** is exactly like the Sarasvatī which, though equally vitally existing, does not show itself

1. Cf. Kālidāsa: प्रासादजालैरुजलवालरम्या रेवा यदि प्रेक्षितुमस्ति कामः। Raghuvaṃśa VI. 43.

2. तिसृणां वेणीनां समाहारस्त्रिवेणि, त्रिवेणीव त्रिवेणिका। अथवा तिस्रो वेण्यो यस्याः सा त्रिवेणी, त्रिवेण्येव त्रिवेणिका। स्वार्थे कन्—त्रिवेणिका p. 2.

in any visible or directly perceptible form. So this work being in all points exactly like त्रिवेणिका, the author has chosen the title of त्रिवेणिका for it. (1)

A very brief survey of the subject it treats of.

Thus it is clear from the title itself, that the work has for its subject matter, the investigation of the powers of words. The problems relating to the denotation and connotation of words have been always engaging the attention of our philosophers, both ancient and modern. What were crude and unsystematic guesses at truths, were afterwards presented in clear and systematic forms of learned theories. All are at one in having what is known as अभिधा or denotation. There is a word and that word stands for a certain thing. Wherever we hear it uttered, that meaning at once flashes on our minds. The relation between a word and its meaning, howsoever it might have been established,(2) is so definite that the two are inseparable and co-existent. Such a process is what is known as अभिधा-व्यापार. There are, however, some philosophers, who carry this process to such an extreme that they abnormally(3) extend denotation to include even those meanings which are not denoted but are indicated or suggested.

---

1. शक्तिमक्तिभ्यक्तिगङ्गायमुनापृथङ्निर्भराः। निर्वाहन्त्यः सन्त्यश स्याच्चेया त्रिवेणिका॥ त्रिवेणिका p. 1.

2. This relation is explained by the Naiyāyikas by ascribing its establishment to ईश्वरेच्छा Others, including the Vaiyākaraṇas and the Ālaṅkārikas, hold संकेत or convention as the cause of this relation.

3. सोयमिधोरित दीर्घदीर्घतरो व्यापारः। The view has for its exponents, the Mīmāṁsakas from whom it was taken up by Bhaṭṭa Lollaṭa. Cf. Mammaṭa's Kāvyaprakāśa, Ullāsa V.

But there were numerous others who could not think it possible to include all processes of words under a single one. They thought that besides this अभिधाव्यापार there must be another to explain all these meanings which were not directly denoted but were indirectly indicated. What that another should be, was a mooted point for centuries and centuries together. Earliest indications of an attempt for explaining such indicated senses we find in Mahābhāsya(1) of Patañjali and the Nyāya Sūtras(2) of Gautama. Some varieties of लक्षणा are found referred to in Yōga Vāśistha and Adhyatma Ramayaṇa(3); but both are of quite uncertain date. As time went on all philosophers gradually came to believe in this process of indication some way or other. The Vaiyākaraṇas considered it an extension of अभिधा and hence called it अभिधा । The Mīmānsakas, mostly those of the Bhāṭṭa school, have only that part of it which is known to us as शुद्धा ।

Among Ālankārikas themselves there is a great

---

1. Under Pāṇini's sūtra दुषोगादाख्यायाम् । V. 1. 48, we find: कूपं पुनरतस्मिन् स इत्येतद्भवति । चतुर्भिः प्रकारैरतस्मिन स इत्येतद्भवति तात्स्थ्यात्, तार्म्यात्, तत्सामीप्यात्, तत्साहचर्यादिति । Patañjali cites गङ्गायां घोषः-the well-known example-as an instance of तत्सामीप्य । This was pointed out to me by Pt. Ambikā Prasād Upādhyāya.

2. सहचरण स्थान तादर्थ्यवृत्तमानधारण सामीप्य योगसाधनाधिपत्यानि न्या० सू० २. २. ६२ See Dr. S. K. De's History of Hindu Poetics, Vol. II, P. 186. Bhimācārya, the learned author of the Nyāyakos'a, however ofserves: "वस्तुतस्तु सहचरणादीनि शक्यसम्बन्धग्राहकाण्येव नारोपनिमित्तानि-इति तु स्वं प्रतीमः ।"

3. I am indebted for this kind reference to Pandit Rāmāvatāra S'armā.

divergence of opinion. Vāmana(1) and the author of Agnipurāṇa(2) treat लक्षणा as a species of alaṅkara. Kuntaka includes it in his वक्रोक्ति(3). There were others who placed almost all the varieties of लक्षणा under रूपक(4) just like some of the westerners(5) who unconsciously made their metaphors include all those instances which to Indian Ālaṅkārikas are nothing but instances of लक्षणा. With Ânandavardhana(6) has come the scientific treatment of these powers of words. Abhinava Gupta, Mammaṭa and others have mostly followed the same line.

As for व्यञ्जना, we cannot trace it consistently and definitely to any ancient work such as Patañjali's Mahābhāṣya or Gautama's Nyāya sūtras. Undoubtedly the Vaiyākaraṇas when they believed in स्फोट, believed tacitly in व्यञ्जनाव्यापार; but they were not prepared to avow it openly. The Ālaṅkārikas got hints from these Vaiyākaraṇas, but surpassed them by establishing it as firmly as possible. Modern Vaiyākaraṇas have come to regard व्यञ्जना also as शब्दवृत्ति।

Nāgeśa Bhaṭṭa, the foremost grammarian in the last few centuries, makes his position quite clear. He thinks with good reason that the significance of nipātas and the manifestation of स्फोट cannot be

1. Alaṅkāra Sūtra, IV. 3. 8.

2. Bibliotheca Indica, Ch 344 87, 11.

3. See वक्रोक्तिजीवित and Dr. S. K. De's Introduction thereto.

4. The view of भामाकर criticised by Jagannātha in his रसगङ्गाधर P. 224.

5. See especially Aristotle's Rhetoric III ch. 10.

6. Ānandavardhana speaks of them as त्रयो विद्वांसः; see in काव्यप्रकाश the वृत्ति on the definition of ध्वनि।

satisfactorily explained unless we have **व्यञ्जनाव्यापार** as a distinct power of words.(1)

Works on similar topic:

We have seen above how the problems relating to the powers of words have been treated by our philosophers. With the establishment of **लक्षणा** and **व्यञ्जना** as necessary but indirect functions of words, there came to be felt a want of handy books treating of this subject as a whole. Mukula Bhaṭṭa wrote his **अभिधावृत्तिमातृका**(2) but as it represented the older view and consequently was one-sided, it could not satisfy all. Mammaṭa's **शब्द-व्यापारविचार** is an excellent epitome. But it reads like a summary, and in fact it is a summary, of the discussions contained in his **काव्यप्रकाश**। Appaya Dīkṣita commenced his excellent **वृत्तिवार्तिक**(3), but could not unfortunately complete it. Had it contained even the third chapter on **व्यञ्जना**, **वृत्तिवार्तिक** would have been the best work on this subject. There are many other monographs such as **वृत्तिदीपिका** of Kṛṣṇa Bhaṭṭa(4) but as they are still in MSS, we do not know what they are. Âśādhara, before he wrote **त्रिवेणिका**, had done full justice to this subject in his **कोविदानन्द** and in its commentary called **कादम्बिनी** written by himself. But unfortunately the work even in MS form is quite rare. It has been only once noticed.

---

1. अतएव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च इत्यादिनिरस्का। वैयाकरण-मप्येतदस्वीकार आवश्यक। मञ्जूषा।

2. Published in N. S. Press Bombay along with शब्दव्यापारविचार।

3. Ibid.

4. Aufrecht's Catalogus Catalogorum, I. 598a.

Its salient features:

Under such circumstances, we are not far wrong if we think that त्रिवेणिका is the best work so far available. The subject is a complex one. It may be called grammatico-rhetorical or still more appropriately grammatico-philosophico-rhetorical. It is really surprising why Dr. De and Mr. Kāṇe did not notice त्रिवेणिका in their excellent works on Hindu Poetics. The latter does mention कोविदानन्द but wholly omits the name of त्रिवेणिका। Perhaps the reason is that they could not see the MS. They only consulted Catalogues where it is classed under grammatical works. The peculiar advantage which त्रिवेणिका has over others of its class is that it is at once both learned and simple. The author, fully conscious of the difficulties which a student has to face, tries to handle the subject in a very scientifically simple way. He does not, however, disappoint learned scholars. He refers here and there to various theories held by logicians and others. He quotes with deference the views of भाष्यकार, वार्तिककार, काव्यप्रकाशकार and many others. He divides his work according to the three topics into three chapters. Under each chapter he cites many examples from standard works such as नैषध and किरात to illustrate his dissertation. Unlike many others he never makes a parade of his learning. He cares more to be clear than to be learned.

II THE AUTHOR.

Among writers on Hindu poetics, there have been two persons who go by the name of Âśâdhara.(1)

1. The older Âs'âdhara was brought to our notice by Peterson in 1883 while the latter was first noticed by Bühler in 1871.

This similarity in their names has led some scholars to confuse the one for the other.(1) Though Aufrecht placed both of them together,(2) he quite pertinently doubted their identity.(3) It is really surprising how Dr. Haricand S'āstri, after so many years and with the advance of so much research, committed the great mistake of wholly identifying the two.(4) The only point of similarity is the name Âśādhara. In all other respects they are quite distinct. One of them dates his Triṣaṣṭhismṛti-candrikā in 1296,(5) while the other is a commentator of Appaya Dīkṣita and quotes Bhaṭṭoji Dīkṣita's Siddhānta Kaumudī. The older Âśādhara speaks of himself as the son of Sallakṣaṇa and born in Vyaghreravāla family. He was a Jaina teacher and wrote besides many other works, a commentary on Rudraṭa's Kāvyalaṅkāra.

The Âśādhara, with whom we are concerned here, is the younger one. Who and what he was, where and when he lived—these are questions which are, as in the case of many others, never perhaps to be answered with any degree of satisfaction. He speaks of himself as the son of Rāmaji Bhaṭṭa and a pupil of Dharaṇīdhara.(6) These two are still less known. For his father, he

1. See Dr. De's Hindu Poetics, Vol. I, p. 99.

2. Catalogus Catalogorum, I. 54b

3. Ibid I. 58a. Dr. De is not, therefore, wholly just to Aufrecht when he thinks that he was wholly confused.

4. See his Kālidāsa et L'art Poetique de L'Inde, p. 16.

5. For fuller details see Peterson's Report II, p. 85, Aufrecht's Cat. Cat. I.54b, De's Hindu Poetics, Vol. I, p. 99.

6. In the maṅgalācaraṇa of his Alaṅkāradīpikā, he writes—शिवपोलनयं नत्वा गुरुं च धरणीधरम् । आशाधरेण कविना रचयिष्ये सुखाय etc.

uses the phrase पदवाक्य प्रमाण पारावारीण (1) and for himself, the epithet of कवि। Perhaps he studied Vyakaraṇa, Nyaya and Mīmaṁsā with his father and poetics with his guru, Dharaṇīdhara. He might have been an inhabitant of Gujarat, for it is there that most of his works have been noticed(2).

He does not date any of his known works. He is quoted by a certain Janardana(3), who is as little known as himself. Thus we find that in determining his date we are wholly to depend upon the internal evidence. He is the author of Alaṁkara Dīpika, a well-known commentary upon Appaya Dīkṣita's Kuvalayananda. Appaya's date is well-nigh settled.(4) He flourished in the latter half of the 16th and the first quarter of the 17th century. More over, our author quotes Bhaṭṭoji Dīkṣita's Siddhanta Kaumudī. Bhaṭṭoji undoubtedly belongs to the first half of the 17th century.(5) There is every possibility that our author knew Vaiyakaraṇa Bhūṣaṇa of Koṇḍa Bhaṭṭa. The position of Vaiyakaraṇas with regard to व्यञ्जना criticised by Âśadhara is no doubt that of Koṇḍa Bhaṭṭa.(6) Âśadhara has most probably taken the definition of S'akti from Vaiyākaraṇa-bhūṣaṇa which in its turn got it from वा-

1. In the colophon of Trivenikā, see p. 29.
2. See the Reports of Bühler, Kielhorn and Peterson.
3. Aufrecht's Catalogus codicum, 198a.
4. Kāpe: Introd. to Sāhitya Darpaṇa Cxxxi; De: Hindu Poetics, Vol I, p. 266.
5. Belvalkar: Systems of Sansk. Gram, p. 43; K.P. Trivedi: Introd. to Vaiyākaraṇabhūṣaṇa, p. 20, Ind. Ant, Nov. 1912.
6. See त्रिवेणिका pp. 27-28 and वैयाकरणभूषण (Ch. on शक्तिनिर्णय)

क्यपदीय and शब्दकौस्तुभ(1). The time of Koṇḍa Bhaṭṭa, who was a nephew to Bhaṭṭoji Dikṣita, is the middle of the 17th century.(2) We may, therefore, take the middle of the 17th century as the upper limit of Âśadhara's date.

Now, let us see how far we can settle the lower limit of our author's date. His Kovidananda is dated by the scribe of the MS in 1783 S'aka (1861 A. D)(3). A MS of अलङ्कारदीपिका the commentary upon the karikas of कुवलयानन्द by the same author, bears śaka 1775 (1853 A. D) as the date of its copying(4). Thus we find that by the middle of the 19th century, the author was widely known. For becoming so much popular, his works must have taken more than a century. Now we know that among Vaiyakaraṇas it is Nageśa (or Nagoji) Bhaṭṭa who holds(5) व्यञ्जना as a distinct वृत्ति quite unlike his predecessors who included it under the दीर्घव्यापार of अभिधा. Nageśa thinks that this power of words was tacitly believed in by Bhartṛhari and others for the manifestation of स्फोट। Âśadhara never dreams that there is such a section of grammarian-philosophers. The Vaiyakaraṇas known to him are those who hold that शक्ति or अभिधा is the only शब्दवृत्ति and that लक्षणा and

1. See वैयाकरणभूषण p. 118 and K. P. Trivedi's notes thereon.

2. Belvalkar: Systems of Sansk. Gram. p. 48; K. P. Trivedi's Introd. to वैयाकरणभूषण p. 20.

3. Bhāndārkar: List of Sansk. MSS Part I, Bombay 1893, p. 68.

4. Ibid p. 69.

5. See Manjūṣā (both) on शक्तिविचार especially the section dealing with व्यञ्जना।

व्यञ्जना are included in its fold(1). Thus it becomes quite clear that the new development brought in by Nageśa in grammar-philosophy was wholly unknown to Âśadhara. The date of Nageśa gives us therefore the other limit of Âśadhara's date. Nageśa was living in the last quarter of the 17th and the first quarter of the 18th century(2). The works of Nageśa Bhaṭṭa became quite popular even in his life time. He was held in great honour by a good many princes. He was invited by the Maharaja of Jayapura on the occasion of a great sacrifice but he courteously refused the invitation(3). Under such circumstances, we are to suppose that Âśadhara might have been a little prior to Nageśa, or, as is perhaps more probable, his senior contemporary. Viewing all points in their due regard and relation to Âśadhara we can only say that he in all probability belongs to the latter half of the 18th century.

His works:

Besides त्रिवेणिका Aśadhara wrote a number of other works among which only अलङ्कारदीपिका has been so far published. अलङ्कारदीपिका is a running commentary on Appaya Dīkṣitā's कुवलयानन्द and has been quite widely known. He comments upon the karikas only and has nothing to do either with the discussions or with examples. It has been published at many places but the most

1. He says: अथ वैयाकरणाः—शक्तिरेव शब्दवृत्तिः, तस्याश्च अभिधाभिधिद्धि-र्या शक्तिलक्षणाव्यपदेशः। व्यञ्जना तु तत्रान्तर्भवति रीतिन्यायादिति etc. त्रिवेणिका p. 27–28.

2. Belvalkar: Systems of Sanskrit Grammar p. 49; Pt. Durgā Prasāda's Introd. to Rasagangādhara.

3. Ibid.

well-known edition is that of Nirṇaya Sāgara Press, Bombay. It has been translated into German by R. Schmidt and published at Berlin in 1907(1).

कोविदानन्द is very often referred to in the त्रिवेणिका; but unfortunately it has not as yet seen the light. From the references in त्रिवेणिका we are led to suppose that it covered the same subject and perhaps in fuller details. Our suppositions are corroborated by the description of a MS of this work noticed by Dr. R. G. Bhāndārkar(2). There our author clearly says:—

प्राचां वाचां विचारेण शब्दव्यापारनिर्णयम् ।
करोमि कोविदानन्दं लक्ष्यलक्षणसंयुतम् ॥

We further learn that this कोविदानन्द is accompanied by a commentary called कादम्बिनी, written by the author himself. Had it been published, it must have been without doubt the best work on the subject. There is another work which also belongs to our author. It is अद्वैतविवेक। We do not know what it is, but as is shown by its title it must probably be a work on Vedānta. At the end of the त्रिवेणिका, he refers to his प्रभापटल from which he quotes two stanzas composed by himself in Hariṇī metre. What this प्रभापटल was, we cannot exactly say. It might have been a work on Tantra. So far as the present writer's knowledge goes, प्रभापटल has not been noticed by any person.

---

1. I have not been able to get this translation here and so I regret I could not know what the learned translator has to say about Āśādhara and his works.

2. List of Sanskrit MSS, Part I, 1853, Bombay. See on page 68.

Thus our author seems to have been more or less a prolific writer; but unfortunately some of his works have wholly disappeared and others which are extant, have not as yet found an editor.

III THE PRESENT TEXT

The small work of Āśādhara Bhaṭṭa called Triveṇikā which is presented herewith, is based on two manuscripts designated here as क and ख.

क MS:

This manuscript belongs to the Sarasvatī Bhavana Library, Benares. It is written on old country paper in Devanāgarī characters. It consists of 18 leaves measuring 10" × 4½" in size with 11 lines on each page and with 30 letters in each line on the average. The scribe seems to have been an ordinary person, for he commits here and there a number of obvious grammatical mistakes. These are so transparent that it was wholly useless to note them in the foot-notes. The manuscript is, however, in a very good condition and this fact undoubtedly reflects a great credit upon the management in the above mentioned Library.

ख MS:

This manuscript belongs to myself. It is a transcript of a manuscript belonging to a certain Pandit of Benares who can not now be found out. A friend of mine got it copied for me. As I never then thought that I might be called upon to edit this work I did not care to get the details of, or myself see, the original. The transcript has been of very great use in settling many points with regard to the readings,

especially as it happens to be more correct and clear than the MS. क.

I take this opportunity of expressing my sincere thanks to Prof. Hardatta S'arma of Delhi for his ready co-operation in preparing a part of the press-copy. But as he is engaged in bringing out the Jayamaṅgalā Tika on S'āṁkhya karikas-a very important work, I could not find it justifiable to take advantage of his obliging nature any more. All credit is due to Pandit Jagannatha S'astri Hośing, the Sadho Lal scholar of the Govt. Sanskrit College, Benares. With his usual diligent habits he has spared no pains in making the present edition what it is. My warm thanks are also due to my highly esteemed friend Pandit Narayana S'astri Khiste of the Sarasvati Bhavana Library whose colossal sāhitya scholarship has been always of substantial help to me. I may also refer to–for it is simply impossible to adequately express–the deep sense of gratitude which I owe to the most revered and learned editor of the Series for his uniformly affectionate kindness to me.

The Benares Hindu University,
शिवरात्रि, १९८१,
21st Feb. 1925.

BATUK NATH SHARMA.

॥ श्रीः ॥

श्री आशाधरभट्टकृता

त्रिवेणिका ।

प्रणम्य पार्वतीपुत्रं कोविदानन्दकारिणा ।
आशाधरेण क्रियते पुनर्वृत्तिविवेचना ॥ १ ॥

वर्तते शब्दोऽर्थे प्रवर्ततेऽनयेति वृत्तिः । बाहुलकात्करणे क्तिन् प्रत्ययः । दृश्यते ह्यन्यत्राऽपि करणे क्तिन्, यथा-अन्तःकरणवाचिबुद्धिशब्दे (१)प्रेमवाचकभक्तिशब्दे चेत्यादौ । अत एव भागवतसुबोधिन्यां धात्वर्थः सेवापत्ययार्थः प्रेमेत्युक्तम् । मल्लिनाथेन च पूज्येष्वनुरागो भक्तिरित्युपदेश इत्युक्तम् । साहित्यदर्पणे तु (२)वृत्तिशब्दस्थाने शक्तिशब्दो दृश्यते ॥

शक्तिभक्तिव्यक्तिगङ्गायमुनागूढनिर्झराः ।
निर्वाहवन्त्यः सन्त्यत्र यत्तदेषा त्रिवेणिका ॥ २ ॥

शक्यते साक्षादभिधीयतेऽनयेति शक्तिः । बाहुलकात् करणे क्तिन् । धातुनामनेकार्थत्वाच्छक्नोतेः साक्षादभिधानार्थत्वम् । भज्यते शक्यार्थः खण्ड्यतेऽनयेति भक्तिर्लक्षणा । भञ्जो आम-

(१) शब्दे—इति क० पुस्तके नास्ति ।
(२) अनुवृत्ति—इति क० पुस्तके पाठः ।

र्दने इति धातोः करणे क्तिन्। अथवा भज्यते सेव्यतेऽर्थान्तर-मनयेति भक्तिः। भज सेवायामिति धातोः क्तिन्। व्यज्यते प्रकटीक्रियतेऽनयेति व्यक्तिर्व्यञ्जना। गूढनिर्झरा सरस्वती। एषा वृत्तिविवेचना (१)तिसृणां वेणीनां समाहारस्त्रिवेणि त्रि-वेणीव त्रिवेणिका। अथवा तिस्रो वेण्यो यस्यां सा त्रिवेणी त्रिवेण्येव त्रिवेणिका। स्वार्थे कन्॥

काव्यादिषु शब्दजन्यमर्थज्ञानं त्रिविधं-चारु चारुतरं चारुतमं चेति। तत्र शक्तिजन्यं चारु। यथा 'पाकं कुरुष्व पाकार्थम्' इति। अत्र पाकशब्दस्य शिशुवाचकत्वमन्वयबोधश्च व्युत्पन्नानामेव भासते इति चारुत्वम्। यत्तु 'चणकांश्चर्वति गालिं च ददाति' इत्यादिग्राम्यवाक्यजन्यमचारु न तत्काविभिरा-द्रियते॥ लक्षणाजन्यं चारुतरम्। यथा दधिद्रोणक्रयकामेन केनचित्कश्चिद्गोपालः पृष्टः-'भ्रातर्दधि दास्यसि क ते निवास' इति। तेनोक्तं-'दास्यामि गङ्गातटे मे घोष' इति। तच्छ्रुत्वा दूरात्कथमानेतुं शक्यमित्युपेक्षितः सः। पुनश्चाऽन्यः पृष्टः-'भ्रातर्दधि दास्यसि क ते निवास' इति। तेनोक्तं-'दास्यामि मे गङ्गायां घोष' इति। तदा नागरिकस्य चेतस्यागतमेतदीय-मेव दधि ग्राह्यमिति। यतो गङ्गाप्रवाहनिकटेऽयं वसति वृक्षवाता-दिसद्भावाद् पथि तापादिबाधा न स्यादिति सुखितपशुजन्य-त्वात्स्वादुतरं गङ्गाम्भःसम्बन्धात्पावनं चेति चारुतरत्वम्। अ-न्यथा स्यात्ते शब्दप्रयोगे किमित्यवाचकः शब्दः प्रयुज्यते। यद्यपि घोषस्य प्रवाहनिकटवृत्तित्वज्ञानं लक्षणाजन्यं तदधिक-ज्ञानं तु व्यञ्जनाजन्यमिति सिद्धान्तः। तथाऽपि व्यञ्जना ल-

(१) एषा वृत्तिविवेचना—इति ख० पुस्तके नास्ति।

क्षणामूलेति लक्षणाजन्यत्वं न हीयते । अत एवेदं लक्षणाफलमित्याहुः । अत्र फलवतीयं लक्षणा । निरूढलक्षणायाः शक्तितुल्यत्वात्तज्जन्यं चारु एव ॥ व्यञ्जनाजन्यं चारुतमम् । यथा शक्रध्वजोत्थापने उद्यानिकाभोजनानन्तरमुपविष्टेन राज्ञा सूपकार आज्ञप्तः—'अहो ! शीघ्रं भोजय भृत्यान् मतोऽस्तमर्कः' इति । ततः शब्दशक्त्या विवक्षितार्थं ज्ञात्वा सूपकारो गतः । अथ व्यञ्जनया ब्राह्मणानां 'सन्ध्यासमयो जात' इति बोधो जातः । सारथीनां 'रथयोजनसमयो जात' इति । दीपिकाधारिणां 'तत्समयो जात' इति । एवमन्येषां नानाविधो जात इति चारुतमत्वम् । अत एव निरवधिर्व्यङ्ग्योऽर्थः । यद्यपि नापितगोपालादीनामपि दीपप्रद्योतनगोदोहनादि(१)समयो जात इति व्यङ्ग्यार्थभानमस्ति तथाऽपि चारुतमत्वं न हीयते, राजसेवकानामतिचतुरत्वात् । चारुतमत्वं ह्यतिचतुरवेद्यत्वमिति । अथवा राज्ञो बोधनीयत्वेन ब्राह्मणादयो बुद्धिमत्तया(२)ऽभिमताः । तेषां सन्ध्यानादरदर्शनेन क्रोधोत्पत्तेः । अन्येषां तु प्रसङ्गाद्बोध इति न विरोधः ॥

वृत्तिविषयभूतार्थास्त्रिविधाः । तत्राऽऽद्यः शक्यो वाच्योऽभिधेयो मुख्यार्थश्चेत्युच्यते । द्वितीयो लक्ष्यो लाक्षणिको भाक्त औपचारिकश्चेति व्यपदिश्यते । तृतीयो व्यङ्ग्यो गम्यः प्रतीतो ध्वनित इति व्यवह्रियते ॥

अर्थत्रयानुसारेण शब्दा अपि त्रिविधाः । तत्राऽऽद्यो वाचकः शक्तोऽभिधायकश्चेत्युच्यते । द्वितीयो लक्षको लाक्षणिक

(१) गोदोहनादि—इति ख० पुस्तके नास्ति ।
(२) बुद्धिमत्तमा—इति क० पुस्तके पाठः ।

औपचारिको भाक्तश्चेति व्यपदिश्यते । तृतीयो व्यञ्जको ध्वननो द्योतकः प्रत्यायकश्चेति व्यवह्रियते । तद्वशा(१)त्तिस्रो वृत्तयो भवन्ति । वृत्तिर्व्यापारः क्रिया चेति पर्यायशब्दाः । तत्राऽऽद्या शक्तिरभिधा मुख्या चेत्युच्यते । द्वितीया लक्षणा भक्तिरुपचारश्चेति व्यपदिश्यते । तृतीया व्यञ्जना द्योतना प्रत्यायना चेति व्यवह्रियते । तत्राऽर्थानां योग्यार्थे व्युत्पत्तिः, शब्दानां कर्त्रादिषु वृत्तिः, वाचकानां करणे चेति सम्प्रदायः ॥

वृत्तित्रयमध्ये सङ्केतग्रहकारणा शक्तिः । सङ्केतस्तु 'अस्माच्छब्दादयमर्थो बोध्य' इति प्रवर्तकोपदेशः । स च शब्दे स्थितो ज्ञातः सन् अर्थान् विषयीकरोति । तत्र च प्रवृत्तिनिमित्तानि गवादिषु गुणः, पाचकादिषु क्रिया, डित्थादिषु संज्ञा चेति । अत एव 'चतुष्टयी शब्दानां प्रवृत्तिः'इति भाष्यकारः । विस्तरस्तु कोविदानन्दे द्रष्टव्यः । सङ्केतस्त्वर्थस्थितं पुरुषज्ञानमुत्सार्य ज्ञातृत्वं जनयति । तत्र शब्दवत्तत्र गता क्रियाऽपि करणं, प्रदीपस्य करणत्वे तत्प्रभावत् । सैव शक्तिः ॥

सा त्रिविधा—योगो रूढिर्योगरूढिश्चेति । न तु तिङन्तं सुबन्तं चेति द्विविधं, तत्राऽऽद्यस्य प्रकृतिप्रत्ययायोगसद्भावात् द्वितीयस्य च 'सर्वमाख्यातजं नाम' इति निरुक्तवचनात् । यद्यपि योगसद्भावादेक एव भेद इति सत्यं, निपातादीनां व्युत्पत्तिकल्पने प्रक्रियागौरवात् फलाभावाच्च भेदद्वयं स्वीकार्यमेवेति । तथा चोक्तं रसप्रदीपे—

---

(१) तद्वशास्तिस्रो वृ०—इति ख० पुस्तके पाठः ।

भवेतां यदि वृक्षस्य वाजिकर्णौ कथञ्चन ।
तदा रूढिं परित्यज्य योगमेव(१) समाश्रयेत्(२) ॥ इति ॥

ननु तर्हि रूढिरेव मन्तव्या भेदद्वयं च हेयमिति चेन्न, रूढ्या केवलया निर्वाहे व्याकरणशास्त्रमनारम्भणीयं स्यात्, पाचकाद्यर्थबोधश्च न स्यात् । योगरूढौ तु प्रायेण समप्राधान्यम् । क्वचिदन्यतरप्राधान्येऽपि न दोषः । यथा 'पद्मानि यस्याम्बुसरोरुहाणि' इत्यत्र योगप्राधान्यं, तेन पद्मशब्दप्रयोगे पुनरुक्तिदोषो नास्ति । 'उत्फुल्लस्थलनलिनी' इत्यत्र रूढेरेव प्राधान्यम्, अन्यथा स्थलनलिनीकुसुमस्य सरसिजत्वासम्भव इति । तत्राऽवयवयोगप्रधाना योगशक्तिः, सङ्केतप्रसिद्धिप्राधान्या रूढिः, उभयप्रधाना योगरूढिश्चेति ॥

अथ भेदत्रयस्य क्रमेणोदाहरणानि—तत्र सुप्तिङन्तयोः 'कृष्णो भवती'त्यादौ प्रकृतिप्रत्ययजन्या योगशक्तिः । नामपदे सनाद्यन्तधातुपदे च । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । परार्थाभिधानं वृत्तिरिति लक्षणम् । तदनुसारात् पचतिधातौ योगशक्तिः क्रमेणोदाह्रियते—पाचकः कर्तरि, पक्वः कर्मणि, पाकः भावे, पचनोऽग्निः करणे, पचनी स्थाली अधिकरणे । बिभेत्यस्मादिति भीमः—अपादाने, दानीयो विप्र इति अव्ययकृतो भावे । इति कृदन्तोदाहरणानि । औपगवः, धनी, देवदत्तकः, एकधा, एकशः, सकृत् इत्यादितद्धितोदाहरणानि । उपराजं, राजपुरुषः, पञ्चराजं, शूरराजः, राजपुरोहितौ, राजमित्रः । 'नखलु नखलु बाणः सन्निपात्योऽयमस्मिन्', 'नहि नहि

(१) योग एव—इति क० पुस्तके पाठः । (२) रसप्रदीपे तु द्वितीयार्धमन्यथैव दृश्यते ।

करिकलभोऽसौ'-अत्र निपातद्वयस्य समासाभावे वीप्सायां 'न खलु न खलु' 'न हि न हि' इति प्रयोगापत्तेः सुप्सुपेति समासः। एवं 'यद्यपि' 'तथापि' 'अथवा' 'यद्वा' इत्यादौ द्रष्टव्यम्। समासफलन्तु व्यस्तप्रयोगाभावः। इति समासोदाहरणानि॥ 'जगतः पितरौ' 'त्रयो देवाः' 'द्वौ पन्थानौ' इत्येकशेषः॥ 'चिकीर्षति' 'पण्डितायते' पुत्रकाम्यति' 'प्रासादीयति कुड्यां भिक्षुः' इति सनाद्यन्तोदाहरणानि। इति योगशक्तिः॥

अथ रूढिः-गच्छतीति गौः, पातीति पिता, गच्छतीति गङ्गा, पातीति पतिः, पातीति पुमान्-इत्यादौ व्युत्पत्तिकल्पनेऽपि रूढिरेव। अर्थबोधे व्युत्पत्तेरनुपयोगात्। उक्तं च-उणादयोऽव्युत्पन्नानि प्रातिपदिकानि। एवं डित्थकपित्थादिशब्दानामपि 'सर्वमाख्यातजं नाम' इति वचनात् व्युत्पत्तिसम्भवेऽपि रूढिरेव॥

अथ योगरूढिः-युधिष्ठिरः युधि स्थिर इति योगः, ज्येष्ठपाण्डवे रूढिः। वनेचरः वने चर इति योगः, किराते रूढिः। पङ्कजं जलजं सरोजमिति योगरूढिः। यद्यपि सङ्केतः सनातनः, शक्तिस्तु प्रयोगकाले प्रकटीभवतीति निर्णयः कोविदानन्दे द्रष्टव्यः, तथाऽपि व्यवहारे शक्तिसङ्केतयोरभेदनिर्देशः॥

अथ कोविदानन्दस्य क्रमेण शक्तिग्राहकान्युच्यन्ते-व्याकरणं, कोशः, निरुक्तं, मुनिवाक्, व्यवहारः, व्याख्यानं, वाक्यशेषः, प्रसिद्धार्थपदसान्निध्यं, उपमानम्। तान्युद्दिश्यन्ते-

पाकं कुरुष्व पाकार्थं चामुण्डां विखरे कुरु।
अजो विधिस्तं चाऽजेन यजेताऽजार्थधर्मधीः॥
हिङ्गुलं पद्मरागाभं तद्वर्णा हिङ्गुलाम्बिका।
यामम्बेति वदन्त्यार्या अन्येऽम्बेति स्तुवन्ति च॥

अत्र पाक्कमित्यस्य भावे घञन्तत्वाद् व्याकरणं शक्तिग्राहकम् । पाकार्थमिति 'पोतः पाक्कोऽर्भको डिम्भः पृथुकः शावकः शिशुः' इति कोशात् । अत्राऽर्भकार्थमित्यर्थे कोशः शक्तिग्राहकः । चण्डमुण्डौ गृहीत्वाऽऽगता चामुण्डा इत्यत्र निरुक्तं शक्तिग्राहकम्, 'अप्यक्षरसाम्यान्निर्ब्रूया'इति वचनात् व्युत्पत्तिं विनाऽपि अक्षरसाम्यमात्रेणाऽर्थबोधात् । तदुक्तं मार्कण्डेयपुराणे--

यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि ! भविष्यसि ॥ इति ।

एवं--

देवानां सुप्रशंसत्वादप्राद्यामोदरं विदुः ।

इत्यादिष्वपि द्रष्टव्यम् । निरुक्तस्याऽऽप्तवाक्यान्तरत्वाभावान्न प्राचीनैः पृथग्गणितमिति बोध्यम् । विखरे कुरु-विखरो बुद्धिस्तत्र कुरु चिन्तयेत्यर्थः । अत्र विखरशब्दस्य बुद्धिवाचकत्वे लिङ्गपुराणस्थं मुनिवचनं शक्तिग्राहकम् । अजो विधिः । अत्राऽजशब्दस्य प्रजापतिवाचकत्वे विधिपर्यायरूपं व्याख्यानं शक्तिग्राहकम् । तं चाऽजेन छागेन यजेत । अत्राऽजशब्दस्य छागवाचित्वे पूर्वापरवाक्यशेषः शक्तिग्राहकः । अजार्थधर्मधीः-इत्यत्राऽजशब्दस्य कामवाचकत्वेऽर्थधर्मशब्दयोः सन्निधिः शक्तिग्राहकः । हिङ्गुलमिति प्रवरागाभं माणिक्यसदृशमित्युपमानं शक्तिग्राहकम् । हिङ्गुला नाम्नी देवी, तद्वर्णा हिङ्गुलसदृशीत्यत्र तथैव । यामम्बेति वदन्त्यार्या ब्राह्मणादयो यां देवीमम्बेति नाम्ना स्तुवन्ति । अन्ये यवनादयोऽल्लेति स्तुवन्ति । अत्र शब्दद्वयस्य देवीवाचकत्वे तद्विदां व्यवहारः शक्तिग्राहकः ।

व्यवहाराभावादेव वेदोक्तमल्लाम्नूक्तं बहवो ब्राह्मणा न पठन्ति। एवमन्यत्राऽपि स्वयमूह्यम्। इति ग्राहकाणि॥

कोविदानन्दकरेणाऽनेकार्थस्य शब्दस्य प्रकृतार्थे शक्तिनियामकान्युच्यन्ते। लिङ्गं, प्रकरणं, फलं, व्यक्तिः, प्रासिद्धमान्निध्यं, आर्हन्ती, समर्थता, देशः, कालः, चेष्टा, साहचर्यं, विरुद्धता, संयुक्तत्वं, वियुक्तत्वं, स्वरादयश्चेति। अथोदाहरणानि। तत्र लिङ्गं यथा-'चतुर्भुजं हरिं वन्दे' इति। 'चक्रहस्त'मिति पाठेऽपि चक्रस्य विष्णुलिङ्गत्वमस्त्येव। असाधारणं गमकं लिङ्गमुच्यते, तेन हरिशब्दस्य विष्णौ शक्तिर्नियम्यते। एवं 'सहस्राक्षो हरिः सेव्यते' इत्यत्र शक्रे शक्तिर्नियम्यते। 'वज्रहस्त' इति पाठेऽपि तथैव। प्राचीनानां 'कुपितो मकरध्वजः' इत्युदाहरणं तु क्लिष्टमित्यवधेयम्॥ प्रकरणं-'हरिर्हि निर्गुणः साक्षात्' इति। अत्र पौर्वापर्यसम्बन्धरूपेण प्रकरणेन हरिशब्दस्य विष्णौ नियम्यते शक्तिः। एवं 'गुरुर्गरीयान् दुरवस्थितः कृतः' इत्यत्र रेणुकां प्रति परशुरामवाक्ये प्रकरणेन गुरुशब्दस्य पितरि शक्तिर्नियम्यते॥ फलं यथा—'मुक्तये हरिं भजति' इत्यत्र मुक्तिरूपफलेन हरिशब्दस्य विष्णौ शक्तिर्नियम्यते। एवं 'स्थाणुं भज भवच्छिदे' इत्यत्र स्थाणुशब्दस्य शम्भौ शक्तिः॥ व्यक्तिर्यथा(१)-व्यक्तिर्नामाऽर्थः, स पञ्चविधः-जातिव्यक्तिलिङ्गसरूपाकारकभेदात्। तत्र जातिर्यथा-'भद्रनागो महाधनः' इत्यत्र जातिविशेषवाचिना भद्रशब्देन नागशब्दस्य गजे शक्तिर्नियम्यते। 'भद्रो मन्दो मृगो मिश्रश्चतस्रो गजजातयः' इति हैमः। व्यक्तिर्यथा—'शिवोपवीतनागेन' इति वाक्ये शिवो-

(१) व्यक्तिर्यथा-इति ख. पुस्तके नास्ति।

पवीतशब्देन शेषे व्यक्तिरुच्यते । तया च नागशब्दस्य सर्पे शक्तिर्नियम्यते। लिङ्गं यथा-'स्वानि शिवं याचति' इत्यत्र स्वशब्दस्य नपुंसकतृत्त्या धने शक्तिः। एवं 'मित्रो जयति' इत्यत्र मित्रशब्दस्य पुंस्त्वतृत्त्या सूर्ये शक्तिः। संख्या यथा--'हरिर्वसति कानने' इत्यत्र एकत्वेन हरिशब्दस्य सिंहे शक्तिः(१)। 'यमौ विलोकयन्' इत्यत्र द्वित्वेन यमशब्दस्य युग्मजातार्थे शक्तिः। 'हरयः सन्ति कानने' इत्यत्र बहुत्वेन हरिशब्दस्य वानरे शक्तिः। कारकं यथा 'अब्धितटे दुष्टोऽरिर्हरिणा हतः' इत्यत्र कर्तृत्वेन हरिशब्दस्य वासुदेवे शक्तिः, तस्य शङ्खासुरहन्तृत्वात्। 'अब्धितटे दुष्टं हरिं हरिर्हतवान्' अत्र कर्मत्वेन हरिशब्दस्य वानरे शक्तिः। तत्र हि बलदेवेन द्विरदाख्यो वानरो हतः। यत्तु प्राञ्चः पुंस्त्वादिकमेव व्यक्तिमाहुः, तच्चिन्त्यम्। व्यज्यते विभक्त्या प्रकटीक्रियतेऽसौ व्यक्तिरिति कर्मव्युत्पत्त्या कृत्स्नस्य नामार्थस्य ग्रहणौचित्यात्। 'पञ्चकं नामार्थः' इति भाष्यसिद्धान्तात्। प्रसिद्धसान्निध्यं यथा-'भक्तवश्यो हरिर्जयति' अत्र भक्तवश्यपदसान्निध्याद्धरिशब्दस्य विष्णौ शक्तिः। एवं 'हेमखर्जूरयोः' इत्यत्र हेमपदसान्निध्येन खर्जूरस्य रजते शक्तिः। अत एव शक्तिग्राहकबलादप्रसिद्धोऽपि खर्जूरशब्दः क्वचित्प्रयुज्यत इति न दोषः। आर्हन्ती यथा-'गुरुरेव परं ब्रह्म' इत्यत्रौचित्याद् गुरुशब्दस्य ज्ञानदातरि शक्तिः। एवं 'जीवो जल्पति' इत्यत्र योग्यतया जीवशब्दस्य बृहस्पतौ शक्तिः, तस्यैव ग्राह्यवचनत्वात्। समर्थता यथा-'सुरभिः पिकमादकः' इत्यत्र कोकिलमदोत्पादनसामर्थ्येन सुरभिशब्दस्य वसन्ते शक्तिः। एवं 'राजा ग्रामधनप्रदः' इत्यत्र

(१) वृत्तिः-इति ख. पुस्तके पाठः।

वित्तसामर्थ्येन राजशब्दस्य नृपे शक्तिः। देशो यथा-'वैकुण्ठे हरिर्जयति' इत्यत्र वैकुण्ठरूपदेशेन हरिशब्दस्य विष्णौ शक्तिः। एवं 'शम्पाप्रासाश्रमे कृष्णम्' इत्यत्र शम्पाप्रासरूपदेशेन कृष्णशब्दस्य वेदव्यासे शक्तिः। कालो यथा-'दिवा विभावसुर्भाति' इत्यत्र दिवसरूपकालेन सूर्ये विभावसुशब्दस्य शक्तिः। रात्राविति पाठे वन्हौ। चेष्टा यथा-'इयं गौर्मेति दर्शयति' इत्यत्र हस्तचेष्टया सर्वनामबोधितया गोशब्दस्य धेनौ शक्तिः। अथमिति पाठे गोशब्दस्य वृषभे शक्तिः। साहचर्यं यथा-'पार्थकृष्णौ रथे स्थितौ' इत्यत्र कृष्णपदसाहचर्यात्पार्थशब्दस्य जिष्णौ शक्तिः। एवं पार्थसाहचर्यात् कृष्णशब्दस्य विष्णौ शक्तिः। विरुद्धता यथा-'रामोऽर्जुनकुलान्तकः' अत्र विरुद्धतया रामशब्दस्य भार्गवे शक्तिः। तत एवाऽर्जुनशब्दस्य कार्तवीर्ये। संयुक्तत्वं यथा-'जयिनौ हरिणौ हरिराघवौ' अत्र हरिशब्दस्य राघवसंयुक्तत्वेन सुग्रीवाख्ये कीशे शक्तिर्नियम्यते। ततश्च राघवशब्दस्य रामे। वियुक्तत्वं यथा-'रामः सीतां स्मरन् दृनः' इति वाक्ये रामशब्दस्य सीतावियुक्तत्वेन राघवे शक्तिः। सीतायाश्च जानक्याम्। स्वरो यथा-'सुधाकरसुहृद्वक्त्रदृष्टिपङ्कज-वैरिणी' इत्यत्र पदद्वयेन तत्पुरुषस्वरोच्चारणेन वक्त्रे दृष्टौ च प्राधान्येन शक्तिः। बहुव्रीहिस्वरपाठे तु सुधाकरपङ्कजयोः प्राधान्येनेति। वस्तुतस्तु काव्यमार्गे स्वरो न गण्यते 'स्वरसंस्कारयोश्छन्दसि नियमः' इति प्रातिशाख्यवचनात्। एषामनेकेषां बोधने 'दानाधिक्यात्फलाधिक्य'मिति न्यायेन सौकर्यातिशयः॥

किं चैवं त्रिविधानामपि शब्दानां प्रयोगे सङ्केतरूढिवि-

भिन्ना प्रयोगरूढिरस्ति। सा च सम्प्रदायरूढिः, कविरूढिः, व्यवहाररूढिश्चेति। तदभावे हि वाचकप्रयोगो न भवति। यथा—न हि वचिरन्तिपरः प्रयुज्यते, गत्यर्थो हन्तिश्च। अत एव नैषधे—

भङ्क्तुं प्रभुर्व्याकरणस्य दर्पं पदप्रयोगाध्वनि लोक एषः।

शशो यदस्यास्तीति शशी, ततो मृगो यस्यास्तीति मृगी नोक्तः। मत्कृतेऽद्वैतविवेके च—

मृगाङ्कत्वेऽपि न मृगी शशाङ्कत्वाच्छशीति तु।
चन्द्रमाः कथितस्तत्र रूढेरन्यन्न कारणम्॥ इति।

अस्या रूढेर्दर्पभञ्जने प्रसिद्धार्थपदसन्निधिरूपं शक्तिग्राहकं शक्तिनियामकं च समर्थभावं भजतः। यथा—'यस्य वेश्मनि खर्जूरम्' इति वाक्ये रजतवाचकखर्जूरशब्दप्रयोगरूढ्यभावाद् दोषत्वेनाऽभिमतः।

यस्य गेहे हिरण्यं च खर्जूरं च कृताकृतम्।
स कथं दीनवदनो याचेदन्यं धनोन्मदम्॥

इति पाठान्तरकल्पने हिरण्यपदसन्निधिः कृताकृतपदसन्निधिश्च खर्जूरशब्दस्य रजतवाचकत्वबोधनसमर्थाविति। तद्बलेन दोषोद्धारः सुकरः। क्वचित्तु पदान्तरसन्निधिबलेन शब्दप्रयोगाभावेऽपि तच्छक्तिरर्थं बोधयति। यथा—'हे राम मां पाहि' इत्यत्र सम्बोधनम्। मध्यमपुरुषसन्निधिबलेन युष्मच्छब्दोऽध्याहियते। अत्र 'युष्मद्युपपदे' इत्यादिसूत्रं प्रमाणम्। अत एवाऽऽह वामनः—'विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ सागराम्बरवत्' इति। अस्मादेव ज्ञापकात् द्विविधोऽप्यध्याहारः समूलः॥

इति श्री आशाधारभट्टकृतायां त्रिवेणिकायां प्रथमं शक्तिविवेचनाप्रकरणम्॥

अथ लक्षणा । शक्यसम्बन्धसहकारिणी वृत्तिर्लक्षणा । सा च शब्दव्यापारत्वाच्छब्दनिष्ठा मुख्यार्थबाधे सति तत्सम्बन्धिनमर्थं विषयीकरोति । सम्बन्धश्च मुख्यार्थे प्राधान्येन वर्तमानोऽपि लक्ष्यार्थमाश्रयति । शक्यसम्बन्धो यद्यपि शब्देऽपि वर्तते तथाऽपि लक्षणायामप्रयोजकः ॥

सा च त्रिविधा–जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा च । यत्सत्त्वे शब्दः शक्यार्थं जहाति सा जहल्लक्षणा । न जहाति चेदजहल्लक्षणा । तदुभययुक्ता जहदजहल्लक्षणा । त्रिविधाऽपि पुनर्द्विविधा–निरूढा फलवती च । शक्तिवत्कोशादौ प्रसिद्धा निरूढा । इयं च मुख्यार्थबाधे प्रवर्तते इति शक्तितो विशेषः । एषाऽनादिलक्षणेत्याहुः । फलवती तु व्यङ्ग्यार्थप्रतीतये प्रवर्तिता । सा चाऽऽधुनिकलक्षणेत्याहुः । अस्याः फलं तु व्यङ्ग्यार्थप्रतीतिः । तत्क्वचिद् गूढं क्वचिदगूढं चेति द्विविधम् । गूढं सहृदयमात्रवेद्यम् । अगूढं तु सर्वजनवेद्यम् ॥ पुनरपि लक्षणा द्विविधा–व्यधिकरणविषया समानाधिकरणविषया चेति । यत्र व्यधिकरणपदं तात्पर्यग्राहकं सा व्यधिकरणविषया । यत्र च समानाधिकरणपदं तात्पर्यग्राहकं सा समानाधिकरणविषया । मुख्यार्थबाधकं तात्पर्यग्राहकं तदेव लक्षणाग्राहकमित्युच्यते । पुनरपि गौणी शुद्धा चेत्येषा द्विविधा । सादृश्यसम्बन्धे सति गौणी । तद्भिन्नसम्बन्धे सति शुद्धा । सम्बन्धश्चाऽनेकविधः । सम्प्रदायक्रमेणोदाहरणानि । 'गङ्गायां घोषः' इति । अत्र गङ्गाशब्देन तत्तीरे त्वधिकरणविषया फलवती जहल्लक्षणा । घोषपदं तात्पर्यग्राहकम् । फलं तु शैत्यपावनत्वप्रतीतिः । केचित्तु तीरं सामीपक (१)आधारसम्बन्धं

(१) सामीपिकाधार०–इति ख० पुस्तके पाठः ।

इत्याहुः । एवं 'द्वैतवने युधिष्ठिरं समाययौ' इत्यत्र सरोविशेषवाचिना द्वैतवनशब्देन तत्तीरे व्यधिकरणविषया फलवती जहल्लक्षणा । युधिष्ठिरसमागमस्तात्पर्यग्राहकः । फलं तु विविक्तताप्रतीतिः । 'यत्र द्वैतवने सर' इति भारतोक्तेः । केचित्तु द्वैतवने निरूढा लक्षणेत्याहुः । तथा चोक्तं भारते—

येन लिङ्गेन यो देशो युक्तः समभिलक्ष्यते ।
तेनैव नाम्ना तं देशं वाच्यमाहुर्मनीषिणः ॥ इति ।

निरूढलक्षणायाः शक्तितुल्यत्वाद्वाच्यमित्युक्तम् । काव्यप्रदीपे च—

यन्नामा यत्र चैत्यादिर्विषयोऽपि स तादृशः ॥ इति ॥

'छत्रिणो यान्ति' इत्यत्र छत्रधारिवाचिना छत्रिशब्देन तत्सहचरेष्वच्छत्रिष्वपि व्यधिकरणविषया फलवत्यजहल्लक्षणा । बहुत्वं तात्पर्यग्राहकम् । फलं तु छत्रिमुख्यत्वप्रतीतिः । 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र काकशब्देन दध्युपघातकमात्रे फलवत्यजहल्लक्षणा । फलं तु काकदुष्टताप्रतीतिः । 'राजा गच्छति' इत्यत्र राजशब्देन गजतुरगादिफलवत्यजहल्लक्षणा । फलं तु राजप्रसिद्धिप्रतीतिः । 'धनुर्भृतः संयति लब्धकीर्तयः' इत्यत्र धनुःशब्देनाऽऽयुधसामान्ये फलवत्यजहल्लक्षणा । एवं 'ब्राह्मणग्रामा'दिष्वपि द्रष्टव्यम् ॥

अथ फलवती जहदजहल्लक्षणा । इयमेव भागत्यागलक्षणेत्याहुः । 'पशूनवक्ति' इत्यत्र पशुशब्देन तन्नेत्रेषु फलवती जहदजहल्लक्षणा । फलं तु सकलतदात्मसंस्कारप्रतीतिः । एवं 'व्रीहीन् प्रोक्षति' इत्यादावपि ज्ञेयम् । 'कर्णावतंसः' इत्यत्र

कर्णाभरणवाचिनाऽवतंसशब्देन भूषणमात्रे फलवती भागत्यागलक्षणा। फलं च तत्र स्थितत्वप्रतीतिः। 'वंशकरीरनीलैः' इत्यत्र वंशाङ्कुरवाचिना करीरशब्देनाऽङ्कुरमात्रं लक्ष्यते। फलं तु चारुत्वप्रतीतिः। 'हिमांशुवंशस्य करीरमेव माम्' इति नलवाक्येऽपि तथैव। 'करिकलभः' इत्यत्र हस्तिबालकवाचिकलभशब्देन बालकमात्रं लक्ष्यते। तत्फलं तु प्रौढिप्रतीतिः। अत एव 'एकार्थं पदमप्रयोज्यम्' इत्युक्त्वा करिकलभकर्णावतंसादिषु प्रतिपत्तिविशेषकरेषु न दोष इत्याह वामनः। केचित्तु कलभादिपदे लक्षणा नास्ति विशिष्टवाचकत्वाभावात्। 'कलभः करिपोतः स्यात्' इति कोशे कर्णादिसम्बन्धाभिधानं प्रयोगरूढिप्रदर्शनार्थमित्याहुः। तेन 'भ्रमरकलभौ कर्णयुगलम्' इति शङ्करस्वामिप्रयोगे लक्षणा न स्यात्। वस्तुतस्तु प्रयोगरूढिर्लोकसिद्धेति कोशादौ तन्निर्देशोऽनावश्यकः। तेन यथोक्तमेव साधु। 'स कीचकैः' इत्यत्र कीचकशब्देन वेणुमात्रे फलवती भागत्यागलक्षणा। फलं तु चारुशब्दोत्पत्तिप्रतीतिः। अन्यथा वेणुमेव ब्रूयात्। अत एव वामनः-'विशिष्टवाचकानां पदानां विशेषणविशेष्यान्यतरसमवधाने सति विशेष्यविशेषणान्यतरमात्रपरता प्राह्या' इति। 'पुंस्कोकिलः' 'पुङ्गवः' इत्यादिषु विशेषणमात्रे इयमेव लक्षणा। तथा च वामनः-'सविशेषणे हि विधिनिषेधौ सति विशेषणे बाधे विशेष्यमुपसङ्क्रामतः, सति विशेष्ये बाधे विशेषणमुपसङ्क्रामतः'। 'वंशाङ्कुरश्चारुरस्ति' इत्यत्र विशेषणमात्रे लक्षणेयमेव॥

अथाऽगूढफला। यद्यप्यगूढफलाऽनावश्यं वक्तव्या तथाऽपि प्राचीनानुसारेणोच्यते। 'गडुद्वयमिदं पीडयिष्यति किं तदेवाऽग्रे कथयिष्यति' इत्यत्र कथनशब्देन बोधनमात्रेऽगूढ-

फला । फलं तु सुखयिष्यतीति प्रतीतिः ॥ 'वसन्तस्तरूनर्तयति' इत्यत्र वसन्तशब्देन तद्वर्तिनि मारुतेऽगूढफला जहल्लक्षणा । फलं तु मन्दगत्या तरुचारुतापादकत्वप्रतीतिः ॥ 'फलिता रम्भा जनानाह्वयति'(१) अत्र रम्भाशब्देन तच्छिरोभागेऽगूढफला जहदजहल्लक्षणा । फलं तु फलस्वादुताप्रतीतिः, भूरित्वप्रतीतिश्च ॥ काव्यप्रकाशे भागत्यागलक्षणा नास्ति जहल्लक्षणायामन्तर्भावात् ॥

अथ समानाधिकरणविषया सारोपा साध्यवसाना च कार्यकारणभावादौ शुद्धा जहल्लक्षणा । यथा–'आयुर्घृतम्, आयुरेवेदम्' इत्यत्र शुद्धा फलवती जहल्लक्षणा । फलं त्वसाधारणकार्यकारित्वप्रतीतिः ॥ एवं तात्स्थ्यात्ताच्छब्द्यम्–'कलिङ्गः साहसिकः' ॥ तादर्थ्यात्ताच्छब्द्यम्–'इन्द्रार्थो स्थूणा इन्द्रः' ॥ स्वस्वामिभावात्ताच्छब्द्यम्–'राजकीयपुरुषो राजा' ॥ सादृश्यसम्बन्धे तु गौणी अजहल्लक्षणा । यथा–'मुखचन्द्रश्चन्द्र एवाऽयम्' । 'गौर्वाहीको गौरेवाऽयम्' । 'अग्निर्माणवकोऽग्निरेवाऽयम्' । 'पण्डितोऽयमपरः सूर्यः सूर्य एवाऽयम्' । 'सिंहो देवदत्तः सिंह एवाऽयम्' इत्यादिष्वजहल्लक्षणा, पूर्वार्थाऽपरित्यागेन गुणरूपाधिकार्थग्रहणात् ॥ अवयवाऽवयविभावे च जहदजहल्लक्षणा । यथा–'अग्रसानुषु अग्रहस्तः, हस्ताग्रं, अग्रपादः, अग्रसेना' इत्यादिषु । फलं तु महत्त्वादिप्रतीतिः ॥ निरूढा यथा–'रवौ नीलं बुधे पीतम्' इत्यत्र रविबुधशब्दाभ्यां तद्वारयोर्निरूढा जहल्लक्षणा । 'मातृविद्धो गणेश्वरः' इत्यादौ मातृशब्देन तृतीया गणेशशब्देन चतुर्थी लक्ष्यते ।

(१) जनान्नाह्वयति–इति क० पुस्तके पाठः ।

24071

इयं च प्राणप्रदार्थित्वात् फलवतीति केचित्। 'यमो न गमने शस्तः' इह यमशब्देन भरणीनक्षत्रं लक्ष्यते। तत्राऽपि पक्षद्वयम्। 'हस्तिहस्तः करिकुम्भः' अत्र हस्तकुम्भशब्दाभ्यां सादृश्याच्छुण्डायां शिरःपिण्डयोश्च निरूढा जहल्लक्षणा। 'बाणैरश्वैश्च हायनैः' इत्यत्र बाणशब्देन पञ्चसङ्ख्यारूपगुणसादृश्यात्पञ्च हायनानि लक्ष्यन्ते। एवमश्वशब्देन सप्त। केचित्तु बाणाश्वशब्दाभ्यां द्रव्यरूपाभ्यां पञ्चसप्तसङ्ख्ययोर्लक्षणा। ततश्च हायनेषु लक्षणेत्याहुः। अन्ये तु बाणशब्देन स्मरणबाणेषु लक्षणा ततश्च सङ्ख्यायां ततो हायने इत्याहुः। एवमश्वशब्देन सूर्याश्वेषु, शेषे तुल्यम्॥

अथ निरूढाऽजहल्लक्षणा। 'श्वेतो धावति' इत्यत्र गुणवाचिना श्वेतशब्देन तदाश्रयणे हयादौ निरूढाऽजहल्लक्षणा। 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' इत्यमरकोशोक्तेः। केचित्तु श्वेतो वर्णोऽस्यास्तीति श्वेतः। अस्त्यर्थे मतुप्। "गुणवचनेभ्यो मतुपो लुगिष्यते" इति तस्य लुकि शक्तिरेवेत्याहुः। 'मञ्चाः क्रोशन्ति' इत्यत्र मञ्चशब्देन तत्रस्था लक्ष्यन्ते। अत्र फलविवक्षायां तु 'तात्पर्याद्विशेषावगतिः' इति न्यायेन फलवत्यपि भवति। एवं 'कुन्ताः प्रविशन्ति' 'यष्टयः प्रविशन्ति' इत्यादावपि ज्ञेयम्। 'द्रोणो व्रीहिः' अत्र द्रोणरूपमानपात्रेण परिच्छिन्ने व्रीहौ द्रोणशब्दो लाक्षणिकः। वैयाकरणास्तु परिमाणं विभक्त्यर्थ इत्याहुः। वस्तुतस्तु सामान्याकारेण परिमाणं शक्यार्थः। द्रोणरूपविशेषाकारेण लक्ष्यार्थ एव। 'सुरद्विषश्चान्द्रमसी सुधेव' इत्यत्राऽसुरसामान्यवाचिना सुरद्विट्शब्देन राहुरूपं विशेषो लक्ष्यते। 'निर्विशेषं न सामान्यं

विशेषा न तदुक्तितः' इति न्यायाद्विशेषार्थलक्षणायां सामान्यार्थो नास्ति । 'तदा निद्रावुपपल्वलं खगः' इत्यत्र सरोविशेषवाचिना पल्वलशब्देन तत्सामान्यं लक्ष्यते । अत्राऽप्युक्तन्यायेन न विशेषार्थत्यागः । लक्षणां विना समुद्रतुल्योक्तिर्न स्यात् ॥

अथ निरूढा जहदजहल्लक्षणा । 'गृहं संमार्ष्टि' अत्र गृहशब्देन तदेकदेशे निरूढः जहदजहल्लक्षणा । एवं 'कुसुमितद्रुमम्' इत्यादावपि । अथ 'सोऽयं देवदत्तः' अत्र पूर्वकालोत्तरकालवर्तित्वपरित्यागेन देवदत्तमात्रं लक्ष्यते । एवं 'शिवोऽहं' 'सोऽहं' 'तत्त्वमसि' इत्यादावपि ॥

अथ लक्षणाप्रयोजकः सम्बन्धो निरूप्यते । स त्रिविधः—संयोगः, समवायो, विशिष्टबुद्धियोग्यश्चेति । 'सम्बन्धबुद्धिजनकः सम्बन्धः' इति तल्लक्षणम् । तत्र द्रव्ययोरेव संयुक्तबुद्धिहेतुः संयोगो गुणविशेषः । स नानाविधः । 'आत्मानमलङ्करोति' अत्राऽऽत्मशब्देन तत्संयोगि शरीरं लक्ष्यते । व्याप्यव्यापकभावसंयोगोऽयम् । 'वटे मावः मुशेरते' अत्र वटशब्देन तत्संयोगि भूतलं लक्ष्यते । तत्र सामीप्यं सम्बन्धः । केचित्तु सामीप्यं सम्बन्ध्यर्थ इत्याहुः । 'घण्टापथः' अत्र घण्टाशब्देन तदुपलक्षिता गजा लक्ष्यन्ते । धार्यधारकभावश्च सम्बन्धः । 'गणकी लेखकी' अत्र गणकलेखकशब्दाभ्यां तत्पत्न्यौ लक्ष्येते । भर्तृभार्यात्वं च सम्बन्धः । 'पुंयोगादाख्यायाम्' इति ङीप् । स्त्रीपुंसयोर्भिन्नस्थानावस्थानेऽपि विवाहकाले हस्तयोजनजन्या संयोगो यावज्जीवं न (१)निवर्तते । भर्तृभार्यात्वेनैमौ संयुक्तकाविति धीजनकत्वात्, यज्ञादौ सहाऽधिकाराच्च । 'सैन्यमुग्रीववाहनः' अत्रोपलक्षणेन मेघपुष्पबला-

(१) यावज्जीवनं निवर्तते—इत्युभयपुस्तकसंमतः पाठः ।

हकावपि गृह्येते । तदाद्यिमश्लोके 'ते हया वासुदेवस्य' इति बहुत्वश्रवणात् । साहचर्यं च सम्बन्धः । 'श्यालः स्वस्रोरथाऽग्रहीत्' इत्यत्र स्वसा च स्वसा च स्वसारौ तयोः । अत्र द्वितीयस्वसृशब्देन तत्पतिर्लक्ष्यते पञ्चादिषु साहचर्यात् । एवं 'प्रथमयोः पूर्वसवर्णः' अत्राऽपरेण प्रथमाशब्देन द्वितीया लक्ष्यते साहचर्यात्, शब्दस्य द्रव्यत्वाच्च । 'गरुडेन निषादग्रामो भक्षितः' अत्र ग्रामशब्देन ग्रामवासिनो जना लक्ष्यन्ते । आधाराधेयभावश्च सम्बन्धः । 'सेतुबन्धे नरः स्नात्वा' इत्यत्र सेतुबन्धशब्देन तदाधारः समुद्रो लक्ष्यते । आधेयाधारभावः(१) सामीप्यं वा सम्बन्धः । एवमन्यत्राऽप्यूह्यम् ॥

नित्यसम्बन्धः समवायः । स पञ्चविधः-अवयवावयविभावो, गुणगुणिभावः, क्रियाक्रियावद्भावो, जातिव्यक्तिभावो, विशेषनित्यद्रव्यभावश्चेति । क्रमेणोदाहरणानि यथा-'शाखामृगो वनमृगः'(२) इह शाखाशब्देन तरुर्लक्ष्यतेऽवयवावयविभावसम्बन्धात् । वनशब्देनाऽपि तथैव । न हि वानरस्य केवलायां शाखायां सकले वने वा नियतः सञ्चारः । वृक्षे तु नियत इति । 'सैन्यानि सोमान्वयमन्वयुस्तं न तं मनोरन्वयमन्वमन्यत' इह वंशवाचिनाऽन्वयशब्देन तदेकावयवो लक्ष्यते । एवं 'रघूणामन्वयं वक्ष्ये' 'निरुद्यमाना यदुभिः कथञ्चित्' इह रघुयदुशब्दाभ्यां तदवयवा लक्ष्यन्ते । 'सन्तानो हि शरीरावयवः' इति धर्मशास्त्रे ॥ 'और्वः पृथ्वी' इत्यत्रौर्वशब्देन पुत्रत्वेन स्वीकृतो वडवाग्निर्लक्ष्यते, पृथ्वी पृथुना पुत्रीत्वेन स्वीकृता भूमिश्च ल-

---

(१) आधाराधेयभाव०-इति-ख० पुस्तके पाठः ।
(२) शाखामृगो वनमृग०-इति क० पुस्तके पाठः ।

श्यते। 'पुंयोगादाख्यायाम्' इति ङीप्॥ 'देवकया सूर्यया सार्धम्' इहाऽप्युक्तसूत्रेण ङीप्। देवकपुत्रीत्वात्सूर्येति तदभिधानम्। न तु सूर्याशब्दो नवोढावाचकः। एवं कुन्तीशब्दोऽपि, 'कुन्ती' भोजपुत्रीत्वादित्यादि स्वयमूह्यम्॥ गुणगुणिभावो यथा—'सुरभिषु फलेषु मानसम्' इह सुरभिशब्देन सुगन्धवाचिना तदाश्रयीभूतफलानि लक्ष्यन्ते। गुणगुणिभावश्च सम्बन्धः। 'शिशिरेऽपि पयसि' इत्यत्र तु न लक्षणा, शिशिरशब्दस्य 'शीतं गुणे तद्वदर्थाः' इति श्लोके अमरसिंहेन द्रव्यवाचित्वाऽभिधानात्। 'शर्करामास्वादयति' इत्यत्र शर्कराशब्देन तद्गतमाधुर्यगुणो लक्ष्यते। गुणगुणिभावोऽत्र सम्बन्धः। क्रियाक्रियावद्भावो यथा—'पश्य मृगो धावति' इति। अत्र धावतीति क्रियापदेन क्रियाविशिष्टो मृगो लक्ष्यते। 'क्रिया नामेयमत्यन्ताहष्टा' इति भाष्यकारोक्त्या(१) तदर्शनासम्भवात्। क्रियाक्रियावद्भावः सम्बन्धः। एवं 'नृत्यं पश्यति देवदत्तायाः' इत्यादावपि। 'भेर्यः श्रूयन्ते' अत्र भेरीशब्देन तद्गतं शब्दं लक्ष्यते। सम्बन्धस्तु स एव। भेर्याकाशगुणित्वं शब्दस्य च गुणत्वमिति गुणगुणिभावः। 'पुष्पं जिघ्रति' तद्गन्धं गृह्णातीत्यर्थः पुष्पस्य पृथ्वीमयत्वात्। गन्धेन सह गुणगुणिभावः। तद्गन्धं जिघ्रतीत्यत्र न लक्षणा। क्रियापदे तु भागत्यागलक्षणा, उपादानमात्रार्थत्वात्। जातिव्यक्तिभावश्च यथा—'क्षत्रजातिरुदियाय भुजाभ्याम्' इत्यत्र क्षत्रजातिशब्देन तदाश्रयीभूता व्यक्तयो लक्ष्यन्ते। जातिव्यक्तिभावश्च सम्बन्धः। 'न जातु

---

(१) क्रिया नामेयमत्यन्तापरदृष्टेति भाष्यात्तद०-इति० क० पुस्तके पाठः।

ब्राह्मणं हन्यात्' इह व्यक्तिपरेण ब्राह्मणशब्देन तत्समवेता जातिर्लक्ष्यते। अन्यथा सर्वेषामवध्यत्वं स्यात्। सम्बन्धस्तूक्त एव। सामान्यविशेषभावोऽप्येवमेव। केचित्तु 'बहुव्यापकं सामान्यम्, अल्पव्यापकं विशेषः' इति लक्षयित्वा तदतिरिक्तमपि सामान्यविशेषभावमाहुः। यथा-'जनेन यूनः स्तुवता' इत्यत्र यून इत्यनेन यौवनविशिष्टा राजानो लक्ष्यन्ते। 'निदर्शनं नैषधम्' इति नले प्रति निर्देशात्। 'अदेवमातृकाः कुरवः' अत्राऽदेवमातृकशब्देन नदीमातृका लक्ष्यन्ते। अन्यथा देवरूपमातृरहिता इत्यर्थः स्यात्। सामान्यविशेषभावश्च सम्बन्धः। यतो देवमातृकभिन्नाः कूपादिमातृका अपि देशा भवन्ति। एवं 'असितयामिनीष्वनीलवाजिनम्' इत्यादावपि द्रष्टव्यम्। विशेषनित्यद्रव्यभावो यथा—'स एव कालेन दुरत्ययेन ते' अत्र कालेनेति भावप्रधाननिर्देशस्तेन नित्यद्रव्यस्य कालस्य सम्बन्ध इति तार्किकाः। यद्वशादयमनेन विशिष्टबुद्धिरुत्पद्यते स विशिष्टबुद्धिजनकः। स नानाविधः। तत्र जन्यजनकभावो यथा-'विशिष्टहेतुरहेतुरागसाम्' अत्राऽऽगःशब्देन तज्जन्यं दुर्यशो लक्ष्यते, तेन दुर्यशसामहेतुरर्थसिद्ध इति। एवं 'मुनिभिः स्मृतः' अत्र स्मृतशब्देन तज्जन्ये कथने लक्षणा। 'मुनयो विदुः' अत्र विदुरित्यनेन तत्कृता ग्रन्था लक्ष्यन्ते। 'ॐमित्येकाक्षरं ब्रह्म' इति वाक्ये ब्रह्मशब्देन ब्रह्मवाचकमित्यर्थो लक्ष्यते। विशेषणविशेष्यभावश्चात्र सम्बन्धः। 'काकः काकः पिकः पिकः' इत्यत्र काकपिकशब्दाभ्यामुक्तसम्बन्धेन निन्दास्तुती लक्ष्येते। 'धनुर्भृतां स्तुवतां पृषत्काः' इह स्तुतशब्देन प्रशस्ता हस्ता लक्ष्यन्ते। एवं 'रामस्य मात्रमसि' इत्यादौ व्यर्थं पदं किञ्चिदर्थं गमयति। अत्र विशेषणविशेष्यभावः सम्बन्धः। 'हरिवं-

शः श्रूयते' 'रघुवंशः पठ्यते' इत्यादौ हरिवंशरघुवंशशब्दाभ्यां तत्प्रतिपादकग्रन्थयोर्लक्षणा । वर्ण्यवर्णभावः सम्बन्धः । 'कुमारकिरातनैषधाः पठनीयाः' अत्राऽपि वर्ण्यनामभिस्तद्वर्णका ग्रन्था लक्ष्यन्ते । नामैकदेशेन समस्तनामग्रहणं चेदवयवावयविभावोऽस्तु । 'अनुकूलं भाषसे' इहाऽपि कूलमनुगतमनुकूलमिति व्युत्पत्त्या तीरलग्न नदीजल वाच्यम् । तत्सादृश्याद्वचने लक्षणा । उपमानोपमेयभावः सम्बन्धः । 'विलोमं वक्ति' अत्र विपरीतं लोम विलोममिति व्युत्पत्त्या वक्रीकृतं विलोमं वाच्यम्, तत्सादृश्याद्वचने लक्षणा । 'समीपं गतः' सङ्गता आपो यस्मिन्निति व्युत्पत्त्या 'अन्तरुपसर्गेभ्यः' इत्यकारस्येकारः । मुलभं जलस्थानं वाच्यम्, तत्सादृश्यात्पार्श्ववर्तिनि प्रदेशे लक्षणा । एवं सम्बन्धान्तराणि स्वयं विभावनीयानि । प्रायो न्यायशास्त्रानुसारादियं विवेचना । अवयवावयविभावस्य कार्यकारणभावस्य सामान्यविशेषभावस्य च द्वैविध्येऽपि न दोषः ॥

अथ त्रिविधे साक्षात् सम्बन्धे सत्येव लक्षणेति न नियमः । प्रत्यक्षे संयुक्तसमवायादिव परम्परासम्बन्धस्याऽपि लक्षितलक्षणादावुपयोगदर्शनात् । तथा लक्षितेन लक्षणया गृहीतेन भ्रमरादिशब्देन द्विरेफादेः षट्पदपिण्डादौ लक्षणा लक्षितलक्षणेत्युच्यते । तत्र द्विरेफशब्दो द्वौ रेफौ यस्मिन्निति व्युत्पत्त्या यौगिको न तु योगरूढो भ्रमरशब्दपरतया प्रयोगाऽदर्शनात् । तेन 'निर्झरगुर्जरनिर्जरा'दिसकलरेफद्वयान्वितशब्दसाधारणवाची न तु केवलभ्रमरपरः । तत्र सामान्यविशेषभावसम्बन्धेन भ्रमरशब्दो लाक्षणिकः । यथा—'मुनिमभिमुखतां निनीषवो यः' इत्यत्र मुनिशब्दो नृपतिमुनौ लाक्षणिकः । 'नृपतिमुनिप-

रिग्रहेण सा भूः' इति प्रयोगदर्शनात्। अथ वाच्यवाचकभावेन लक्षणयाऽभेदारोपात् भ्रमरशब्दलक्षितषट्पदे द्विरेफशब्दस्योक्तरीत्या लक्षितलक्षणा। तत्र सम्बन्धद्वयसम्भवात्परम्परासम्बन्धः। एवं यत्र नामैकदेशे नाममात्रग्रहणं तत्राऽवयवावयविभावसम्बन्धेन समग्रशब्दे लक्षणा। ततस्तदर्थे वाच्यवाचकभावेनेति बोध्यम्। यथा—'आभाकासितपक्षेषु' इति। इहाऽऽभाकेतिशब्दावयवैराषाढभाद्रपदकार्तिकावयविनो लक्ष्यन्ते। ततस्तदर्थभूता मासा इति। एवं 'भीमो' 'भीमसेनः' इत्यादावपि द्रष्टव्यम्। व्याकरणमते तु "विनाऽपि प्रत्ययं पूर्वोत्तरयोर्वा लोपो वक्तव्यः" इति भीमादिषु शक्तिरेव। व्यतिरेकलक्षणायामपि परम्परासम्बन्ध एव। 'नयेन नेतुं जगतीं सुयोधनः' इत्रत्र सुयोधनशब्देन दुर्योधनशब्दे लक्षणा। ततस्तद्वाच्ये राज्ञि, इति विवेकात्। एवं 'साधु वृत्तिं! पुनः साधु' इत्यादावपि बोद्धव्यम्॥

अथ गौण्यां विशेषः। गौणलक्षणायामपि परम्परासम्बन्धः, उपमानोपमेयधर्माणामभेदारोपानन्तरं द्वितीयलक्षणाप्रवृत्तेः। तत्र 'राजेन्द्रः' 'राजेन्दुः' 'नृसविता' 'नृसोमः' 'भूपालसिंहः' इत्यादावुपमितसमासे व्यस्तोपमायां समस्तरूपके च लक्षणा नास्ति। समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवदिति। शब्दार्थस्य एवकारार्थस्य च समासशक्त्या निर्वाहादिति प्राञ्चः। यद्यपि सिद्धान्तकौमुद्याम्-'इह पूर्वपदं तत्सदृशे लाक्षणिकम्' इत्युक्तं, तथाऽपि लाक्षणिकसदृशमिति तदर्थाश्रयणेन समासशक्तिविषयैव तत्राऽनुसन्धेया। अन्यथा स्वसिद्धान्तभङ्गापत्तेः॥ 'उद्बाहुरिव वामनः' इत्यादाविवशब्दस्य सादृश्यवाचि-

त्वादारोपाभावाच्च लक्षणाऽभावः ॥ 'मुखचद्रः' इत्यादौ समस्तरूपके त्वारोपसत्त्वे तस्य समासोत्पन्नसमुदायशक्त्या निर्वाह्यलक्षणाभावः । अत एव व्यस्तोदाहरणानि प्राचीनैर्दर्शितानि । कोविदानन्देऽपि 'क्षीरब्धिं गिरिजा' इत्यत्र व्यस्तमेवोदाहरणमित्यवधेयम् । एवं दृश्यन्तरेऽप्यूह्यम् । अत्रोपमानोपमेयभावसम्बन्धः । सादृश्यं तदेव । तल्लक्षणं तूक्तं विद्यानाथेन--

अन्योन्यधर्मशालित्वं स्पष्टसादृश्यमुच्यते ।
तन्मूलमुपमादीनां हारादीनां हिरण्यवत् ॥ इति ।

अत्र स्पष्टपदेन देवदत्तयज्ञदत्तयोः पशुत्वाभावे मनुष्यत्वब्राह्मणत्वादिधर्मेण सादृश्यं, स्पष्टत्वस्य सम्प्रदायादत्वात् । अन्योन्यशब्देन तद्धर्माभिन्नत्वमुक्तम् । ततश्च भिन्नयोर्धर्मिणोरभिन्नधर्मशालित्वं सादृश्यमित्युक्तं भवति ॥ नन्वन्यधर्मस्यान्यत्रासम्भवादन्योन्यधर्माभेदः कथमिति चेदुच्यते-'तापेन भ्राजते सूरः शूरश्चापेन राजते' इत्यादौ सूरशौर्याशूरशौर्ययोर्भेदेऽपि सजातीयत्वेन भेदाभावः । रूपकादौ स्वभेदारोपाद्भेदाभावः । अयं च वस्तुप्रतिवस्तुभावः कथ्यते ॥ 'त्वमेव कीर्तिमान् राजन्' इत्यादौ च कीर्तिमत्त्वकान्तिमत्त्वयोर्वैजात्येऽपि बिम्बप्रतिबिम्बभावेनाऽभेदप्रतीतियोग्यत्वम् । अत एव लक्षणेऽभिन्नपदेनाऽभेदप्रतीतियोग्यत्वं विवक्षितमिति बोध्यम् ॥ सारोपायां गुणमात्रे लक्षणा । गुणी तु शक्त्या गृह्यते । साध्यवसानायां(१) तु द्वयोरपि तत्र विषयस्य निगरणात् । स्वे-

(१) सारोपायां-इति ज० पुस्तके पाठः ।

च्छयाऽतस्मिंस्तदबुद्धिरारोपः । स्वेच्छया विषयिणा विषयग्रहणमध्यवसानम् । आधरस्वामिना 'गौणी वृत्तिर्भिन्नैव' इत्युक्तम् । यदि लक्षणावृत्तिर्न स्यात्तर्हि घृणाकरं त्रपाकरमश्लीलं चेति त्रिविधमश्लीलं वारयितुं कः क्षमते । तथा हि—

विष्ठोत्सारणकर्ता मर्ता कार्येषु पादचार्यनुगः ।
कृतयाभना च विटस्त्री कार्ये गर्ह्येऽपि तुच्छमूल्यानि ॥

अत्र लक्षणया दोषोद्धारः ।

मलसंमार्जनकर्ता त्यक्तात्मेहश्च पादचार्यनुगः ।
कृतगमना च विटस्त्री कार्ये गुह्येऽपि तुच्छमूल्यानि ॥

अत एवाऽऽहुः—

शक्तिं भजन्ति सरला लक्षणां चतुरा नराः ।
व्यञ्जनां नर्ममर्मज्ञाः कवयः कमना जनाः ॥

इति श्री आशाधरभट्टकृतायां त्रिवेणिकायां द्वितीयं लक्षणाप्रकरणम् ॥

अथ व्यञ्जनाप्रकरणं लिख्यते । शक्यलक्ष्यातिरिक्तार्थबोधिका वृत्तिर्व्यञ्जना । सा च मुख्यार्थबाधाभावेऽपि प्रवर्तते शक्यलक्ष्यार्थबोधानन्तरञ्च । तेन शक्तिमूला लक्षणामूला चेत्याहुः । दूरार्थबोधे व्यञ्जनामूलापि व्यञ्जना भवति । क्रमेणोदाहरणानि । तत्र प्रकृताप्रकृतश्लेषे शब्दशक्तिमूला व्यञ्जनेति प्राञ्चः ।

सा यथा—

आम्नायरहदुत्पन्ना विमला बुद्धिशुद्धिदा ।
कोविदानन्दसहजा ऽनुग्राह्यैषा त्रिवेणिका ॥

अत्र ग्रन्थपरत्वेन तीर्थपरत्वेन कन्यापरत्वेन च योजनया पक्षत्रयम् । तत्र ग्रन्थतीर्थयोरभेदोपचारात्प्रकृतश्लेषः । तत्र सादृश्यमात्रं व्यञ्जनागम्यम् । कन्यापक्षस्तु व्यञ्जनागम्यः । तत्र येषां शब्दानां विनिमयः कर्तुं न शक्यते तदाश्रया व्यञ्जना ॥ शब्दावयवाश्रयापि सा दृश्यते । यथा—

दानी पानी तथा ज्ञानी ध्यानी मानी निधान्यपि ।
राजा मयूरचित्रोऽयं येन राजन्वती क्षितिः ॥

दानी बहुप्रदः । पानी मधपः । ज्ञानी मुज्ञः । ध्यानी नित्यध्याननिष्ठः । मानी अतिशयितमानः । निधानी निधिसम्पन्नः । अत्र—

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायिने ।
सम्बन्धे तु विवक्षायां भवन्ति मतुवादयः ॥

इति वार्तिकोक्त्या भूमनिन्दयोरर्थौ व्यञ्जनागम्यौ तद्धितद्योत्यत्वात् । द्योत्यार्थस्य काव्यप्रकाशे व्यङ्ग्यत्वस्वीकारेण तद्गतो ध्वनितमुदाहृतम् । द्योत्यार्थे हि सङ्केताभावान्न शक्तिः, शक्यार्थबोधानन्तरं तद्बोधाच्च । शब्दबुद्धिकर्मणां विरम्य व्यापाराभावान्नाऽपि लक्षणा मत्वर्थमुख्यार्थबाधाभावात्तत्सम्बन्धाभावाच्च । 'राजन्वती' इत्यत्रापि राजपदं शोभनराज्ञि लाक्षणिकमिति न भ्रमितव्यं वृत्तौ लक्षणा नास्तीति सिद्धान्तात् । तत्र नकारोच्चारणेन शोभनत्वं व्यज्यते इति

प्रकृत्याश्रया व्यञ्जनैवेति दिक् ॥ अर्थाश्रया उभयाश्रया च व्यञ्जना कोविन्दानन्दे द्रष्टव्या ॥ लक्षणाश्रया यथा—

कलत्रवानहं बाले ! कनीयांसं भजस्व मे ।

इत्यत्र कलत्रशब्देन तत्साधिर्ध्ये लक्षणा, अन्यथा लक्षणस्याऽपि तथात्वापत्तेः । 'बाले' इत्यनेन च भूरिकामत्वे लक्षणा । 'बाला स्यात् षोडशाब्दा तदुपरि तरुणी त्रिंशतो यावदूर्ध्वम्' इति रतिरहस्योक्तेः । ततश्चाऽहं भोगतृप्तत्वान्न त्वदभिगम्यः, अतो हि कामातुरायास्तव सन्तोषो न स्यादिति व्यज्यते । किञ्च स्वस्य कलत्रसन्निध्योक्त्या एकपत्नीव्रतं गम्यते । तत्सन्निधौ दुष्टाचरणनिषेधात्सातीयाः स्वाधीनपतिकात्वं चेति । ततश्च 'कलत्रवानहं क, बाला त्वं क' इति विषमालङ्कारोऽपि गम्यः । 'कनीयांसम्' इति लक्ष्मणविशेषणादसन्निहितकलत्रः कनिष्ठश्च स बालायास्तवाऽनुरूप इति समालङ्कारोऽपि गम्यः । स्वस्य लक्ष्मणस्य च विषयालङ्कारोऽपि । यद्वा कलत्रशब्देन लावण्यादिगुणसम्पन्ने लक्षणा । तेन तादृश्या त्वया मम किं प्रयोजनमिति व्यज्यते ॥ व्यञ्जनामूला व्यञ्जना यथा—

क्षीरत्यजं नीरपिबं च हंसं व्यासं विरक्तं च शुकं गृहस्थम् ।
वदामि वाणी मम चेद्यथार्था तदा सुधीभिर्मम धीर्न निन्द्या ॥

अत्र सुधीशब्देन परीक्षाकुशलत्वं व्यज्यते । सुधियो हि परीक्षामन्तरेण स्तुतिं निन्दां वा न कुर्वन्ति । परीक्षा हि हंसानां क्षीरेण सह परिचयाभावात्तद्ग्रहणपाटवं न स्यादेवंति युक्तिः । तत्सदृशानां ज्ञानिनामपि स्थूलतया निन्द्यपरिणाम-

तया आपातरमणीयतया च विषयसुखं हेयं भवति । सूक्ष्मतया निर्विकारितया सर्वकालरमणीयत्वेन च ब्रह्मसुखमुपादेयं भवतीति युक्तिः । लोकप्रसिद्धं तु न तथेति । किञ्च व्यासस्य पत्न्यश्रवणादरण्ये पतिताच्छुकाच्छुकीनामाऽप्सरोदर्शनक्षुभिताप्पुत्रोत्पत्तिवर्णनाद्ब्रह्मविद्याप्रवर्तकत्वाद्विरक्तत्वमध्यवसीयते । प्रसिद्धभारतकथामनादृत्य पत्नीद्वारा पुत्रोत्पत्त्यादिकथनं विरुद्धमेव । शुकस्य चाऽपत्यपञ्चकवर्णनात् स्वरूपेण रूपान्तरेण वा गृहस्थत्वमिति बोध्यम् । तत्र हरिवंशे स्वरूपेण भागवते च 'स कृत्व्यां शुककन्यायाम्' इति शुकोक्तौ मम कन्यायामिति च वक्तव्येऽपि शुकपदं रूपान्तरबोधनार्थमिति । एवं परीक्षिते युक्तिमूला शास्त्रमूला च मम वाणी सत्या भवति चेदेतदर्थविषया मम धीः स्तुत्यैव भवतीति सुधीशब्दे गम्योऽर्थः । ततश्चाऽस्मिन् ग्रन्थे कोविन्दानन्दे च प्रसिद्धिविरुद्धं किञ्चिदस्ति चेत्परीक्ष्य स्तुत्यमेवेति प्रार्थना व्यज्यते ॥

अत्र तार्किकाः—व्यङ्ग्यार्थो हि ज्ञापनेन हेतुनाऽनुमीयते तदर्थं व्यञ्जना न स्वीकार्या । 'अनन्यलभ्यो हि शब्दार्थः' इति न्यायादतिरिक्तवृत्तिस्वीकारे गौरवाच्चेत्याहुः । तत्र, 'साधु दृति ! पुनः साधु' इत्यत्र काकुवक्रोक्तौ व्यतिरेकलक्षणामूलव्यञ्जनया 'मद्वपणेन सह विलसन्त्या त्वयाऽनुचितस्वार्थसाधनं कृतम्' इति व्यज्यते । तत्र दन्तैर्नखैश्च विलुनत्वं हेतुः । तस्य च नियुद्धसाधारणत्वेन सव्यभिचारत्वाच्चाऽनुमानसिद्धिरिति व्यञ्जना स्वीकार्या । एवमन्यत्राऽपि द्रष्टव्यम् ॥

अत्र वैयाकरणाः—शक्तिरेव शब्दवृत्तिः, तस्याश्च प्रसिद्ध्यप्रसिद्धिभ्यां शक्तिलक्षणाव्यपदेशः । व्यञ्जना तु तत्रा-

न्तर्भवति दीर्घव्यापारादिति । तन्न, स्वीकारात् 'सकृदुच्चरितः शब्दः सकृदर्थं गमयति' इति न्यायाद्वाच्यार्थबोधानन्तरं व्यङ्ग्यार्थे शक्तेरप्रवृत्तेः ॥

इन्द्रियाणां स्वविषयेष्वनादियोग्यता यथा ।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥ इति ।

शक्तिलक्षणस्य व्यञ्जनायामप्रवृत्तेश्च । व्यञ्जनाया अनादित्वाभावात् काव्यस्योत्तमादिभेदत्रयाऽनुपपत्तेश्च । उत्तमकाव्यं हि व्यङ्ग्यार्थप्रधानम् । तद्भिन्नं मध्यमम् । गोमूत्रिकादिशब्दचित्रं, वायुमित्रेत्याद्यर्थचित्रं चाऽधमम् । अनुप्रासोपमाद्यर्थाचित्रं चमत्कारकारित्वात् क्वचिदुत्तमं क्वचिन्मध्यमं च । अधमं तु न काव्यतया गणनीयम् । यथाऽऽह ध्वनिकारः—

प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैव व्यवस्थितेः ।
उभे काव्ये तदन्यद्यत्तच्चित्रमभिधीयते ॥ इति ।

ततश्च सिद्धं व्यञ्जनायाः सफलत्वमिति दिक् ॥

यदिह लिखतामभ्युत्प्रेक्षा पतेच्छघु दूषणं
निपुणविषणैरुज्झित्वा तत्कृतिर्मम सेव्यताम् ।
सरसविमले वातक्षिप्तं निवार्य तु शैवलं
सकिलमसृतप्रायं प्रायः पिबन्ति पिपासवः ॥
यदि मम सरस्वत्यां कश्चित्कथञ्चन दूषणं
प्रकटयति, ततः प्रौढप्रज्ञैः स किं कविभिः समः ।
रघुपतिकुटुम्बिन्यां सत्यामवद्यमुदाहरन्
हतकरजकः साम्यं लेभे स किं सह राजभिः ॥

प्रभापटले निबद्धमिदं हरिणीद्वयं तापापनोदाय त्रिवेणिकापान्ते विन्यस्तम् । यथा रघुवंशस्थाः श्लोकाः स्वकृतत्वात् कुमारसम्भवे विन्यस्ताः ॥

इति श्रीपदवाक्यप्रमाणपारावारीणरामजीभट्टात्मज-आशाधरभट्टविरचितायां त्रिवेणिकायां तृतीयं व्यञ्जनाप्रकरणम् ॥

समाप्तश्चाऽयं ग्रन्थः ।

THE PRINCESS OF WALES SARASVATI BHAVANA TEXTS:

Edited by

GOPINATH KAVIRAJ, M. A.

No. 1—The Kiraṇāvalī Bhāskara, a Commentary on Udayana's Kiraṇāvalī, Dravya section, by Padmanābha Miśra.
Edited with Introduction and Index by Gopināth Kavirāj, M.A.

No. 2—The Advaita Chintāmaṇi, by Raṅgoji Bhaṭṭa, Ed. with Introduction etc. by Nārāyaṇa Śāstrī Khiste Sāhityāchārya.

No. 3—The Vedānta Kalpalatikā, by Madhusūdana Sarasvatī.
Ed. with Introduction etc. by Rāmājñā Pāṇḍeya Vyākaraṇāchārya.

No. 4—The Kusumāñjali Bodhanī, a Commentary on Udayana's Theistic Tract, Nyāya Kusumāñjali, by Varadarāja.
Ed. with Introduction etc. by Gopinath Kaviraj, M. A.

No. 5—The Rasasāra, a Commentary on Udayana's Kiraṇāvalī, Guṇa Section, by Bhaṭṭa Vādīndra.
Ed. with Introduction etc. by Gopinath Kaviraj, M. A.

No. 6 (Part I)—The Bhavanā Viveka by Maṇḍana Miśra, with a Commentary by Bhaṭṭa Umbeka.
Ed. with Introduction etc. by Mm. Gaṅgānātha Jhā, M.A., D. Litt.

No. 6 (Part II)—Ditto Ditto

No. 7 (Part I)—Yoginihṛdaya dīpikā, by Amṛtānanda Nātha, being a Commentary on Yoginihṛdaya, a part of Vāmakeśvara Tantra.
Ed. with Introduction etc. by Gopinath Kaviraj, M.A

No. 7 (Part II) Ditto Ditto

No. 8—The Kāvyaḍākinī, by Gaṅgānanda Kavīndra.
Ed. with Introduction etc. by Jagannātha Śāstrī Hoshing Sāhityopādhyāya.

No. 9 (Part I)—The Bhakti Chandrikā, a Commentary on Śāṇḍilya's Bhaktisūtras, by Nārāyaṇa Tīrtha.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A.

No. 10(Part I)–The Siddhāntaratna, by Baladeva Vidyābhūṣaṇa.
Ed. with a Prefatory Note by Gopinath Kaviraj, M. A.

No. 11–The S'rī Vidyā Ratna Sūtras, by Gauḍapāda, with a Commentary by S'aṅkarāraṇya.
Ed. with Introduction etc. by Nārāyaṇa S'āstrī Khiste Sāhityāchārya.

No. 12–The Rasapradīpa, by Prabhākara Bhaṭṭa.
Ed. with Introduction etc. by Nārāyaṇa S'astrī Khiste Sāhityāchārya.

No. 13–The Siddhasiddhānta Saṅgraha, by Balabhadra.
Ed. with Introduction by Gopinath Kaviraj, M. A.

No. 14–The Triveṇikā, by Āśādhara Bhaṭṭa.
Ed. with Introduction by Baṭukanātha S'armā Sāhityopādhyāya, M. A. and Jaganātha S'āstrī Hoshing Sāhityopādhyāya.

No. 15 (Part I)–The Tripurārahasya.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A.

No. 16–The Kāvya Vilāsa, by Chiranjīva Bhaṭṭāchārya.
Ed. with Introduction etc. by Baṭukanātha S'armā Sāhityopādhyāya, M.A. and Jagannātha S'āstrī Hoshing Sāhityopādhyāya.

No. 17–The Nyāya Kalikā, by Bhaṭṭa Jayanta.
Ed. with Introduction by Mm. Gaṅgānātha Jhā, M.A., D.Litt.

No. 18 (Part I)–The Gorakṣa siddhānta Saṅgraha.
Ed. with a Prefatory Note by Gopinath Kaviraj, M.A.

THE PRINCESS OF WALES SARASVATI BHAVANA STUDIES:

Edited by

GOPINATH KAVIRAJ, M. A.

Vol. I—

(a) Studies in Hindu Law (1): its evolution, by Gaṅgā nātha Jhā.

(b) The View point of Nyāya Vaiśeṣika Philosophy, by Gopi nath Kaviraj.

(c) Nirmāṇa Kāya, by Gopinath Kaviraj.

Vol. II—

(a) Parasurāma Miśra ALIAS Vāṇī Rasāla Rāya, by Gopinath Kaviraj.

(b) Index to S'abara's Bhāṣya, by the late Col. G. A. Jacob.

(c) Studies in Hindu Law (2):—its sources, by Gaṅgānātha Jha.

(d) A New Bhakti Sūtra, by Gopinath Kaviraj.

(e) The System of Chakras according to Gorakṣa nātha, by Gopinath Kaviraj.

(f Theism in Ancient India, by Gopinath Kaviraj.

(g) Hindu Poetics, by Baṭuka nātha S'arma.

(h) A seventeenth Century Astrolabe, by Padmākara Dvivedi.

(i) Some aspects of Vīra S'aiva Philosophy, by Gopinath Kaviraj.

(j) Nyāya Kusumāṇjali (English Translation), by Gopinath Kaviraj.

(k) The Definition of Poetry, by Nārāyaṇa S'āstrī Khiste.

(l) Sondala Upādhyāya, by Gopinath Kaviraj.

Vol. III—

(a) Index to S'abara's Bhāṣya, by the late Col. G.A. Jacob.

(b) Studies in Hindu Law (3) Judicial Procedure: by Gaṅgā nātha Jha.

(c) Theism in Ancient India, by Gopinath Kaviraj.

(d) History and Bibliogpraphy of Nyāya V'iśeṣika Literature, by Gopinath Kaviraj.

(e) Naiṣadha and S'rī Harṣa, by Nīlakamala Bhaṭṭāchārya.

(f) Indian Dramaturgy, by P. N. Pāṭankar.

Vol. IV—(In progress)—

(a) Studies in Hindu Law. (4) Judicial Procedure: by Gaṅgā-natha Jhā.

(b) History and Bibliography of Nyāya Vaiśeṣika Literature, by Gopinath Kaviraj.

(c) Analysis of the Contents of the ṚgVeda Prātiśākhya, by Maṅgala Deva Sāstrī.

(d) Nārāyaṇa's Gaṇitā kaumudī, by Padmākara Dvivedi.

(e) Food and Drink in the Rāmāyanic Age, by Manmatha nātha Roy.

(f) Satkāryavāda: Causality in Sāṅkhya, by Gopinath Kaviraj.

To be had of—

The Superintendent, Government Press,
Allahabad, U.P. (India).

Gl-
13/11/25

Central Archaeological Library,
NEW DELHI. 24071
Call No. Sa 4 A/Asa/S.H.
Author— Sarma Sahityopadhyaya.
Title— The Privenika No: 14.

Borrower No.	Date of Issue	Date of Return

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL LIBRARY
GOVT. OF INDIA
Department of Archaeology
NEW DELHI.

Please help us to keep the book clean and moving.